International Journal of Sanskrit Research 2019; 5(5): 149-150

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2019; 5(5): 149-150
© 2019 IJSR
www.anantaajournal.com
Received: 24-07-2019
Accepted: 25-08-2019

डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

Correspondence
डॉ. अनीता कुमारी
एकहरि, प्रखण्ड–लदनियाँ,
जिला–मधुबनी, बिहार, भारत

# कृत्प्रत्ययस्वरूपविवेचनम्

डॉ. अनीता कुमारी

**प्रस्तावना**

कृत्प्रत्ययः कस्माद् भवतीति जिज्ञासायामाह 'धातोः' इति। सूत्रञ्चेदमधिकारः, तृतीयाध्याय समाप्तिं यावत्। अस्य सूत्रस्यानारम्भे हि ङ्याप्रातिपदिकादपि तव्यादयः प्रत्यया आपधेरन्। यद्यत्र साधने तव्यादयोविधीयन्ते, साधनं च क्रियायाः अभावात् साधनाभावः, साधनाभावाद् ङ्याप्रातिपदिकातव्यादयो ना पद्येरनित्युच्यते तर्हि 'आण्वये' त्यादयो येऽपभ्रंशाः क्रियावचनास्तेभ्यस्तव्यादयो माभूवन्नित्येतदर्थं 'धातोः' इत्यधिकार सूत्रमावश्यकम्। न हि तऽपभ्रंशा धातवः, भुवादिपाठाश्रयत्वाद् धातुसंज्ञायाः। अपिच सोपसर्गाल्लङादयो मा भुर्वान्नति धात्वाधिकारः कृतः। अन्यथा प्राकरोत् प्रात्थितः, अध्यैष्ट इतिधातुपसर्ग समुदायस्य विशिष्टक्रियावचनत्वात् ततः प्रत्ययविधौ अवङ्गसंज्ञायामडपि प्रसङ्गो दुर्वारः स्यात्। तथ्यामि दमुक्तं भट्टश्री नागेशेन तथाहि सोपसर्गाणामङ्गत्वव्या वृत्तये इदम् इति।

अत्र जिज्ञास्यते यद् 'धातोः'[1] इति द्वितीयमधिकार सूत्रं नावश्यकम्, यतो धातोरेकाचो हलादेः क्रियासमाभिव्याहारे यङ इति पूर्व सूत्रादेव तव्यत्तव्यानीयरः इत्यारभ्य क्रोऽधिकरो च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः इत्यन्तं यावत् सर्वत्र कृत्प्रत्यय विधायकेषु 'धातोः' इत्यनुवृत्तिः सुलभेति। न च यङः सूत्रस्य धातोः इत्यत्र स्वरितत्वमेव नास्ति कथं ततस्तदुनुवत्तिः सुलभेति वाच्यम् यतस्तत्रधातोः इत्यत्र नूनं स्वरितत्वं स्वीकार्यम्। अन्यथा स्यतासीलृलुटौ[2] इत्यत्रापि तदनुवृत्तिर्न स्यात्। तथा सति भविष्यति इत्यदौ 'भू' शब्दस्य यस्मात् प्रत्यय विधिस्तदादि प्रत्ययेऽङ म्[3] इत्यङ्गसंज्ञा न स्यात्, अङ संज्ञायाभावे सार्वधातुकार्धधातुकयोः इति गुणो न सिध्येत्, इगन्ताङ्गस्य हि तेन गुणो भवति।

यदि तत्र स्वरितत्वं स्वीक्रियते तदा सत्यापाशः इत्यत्रापि तदनुवृत्तिर्दुर्वारिति चूर्णचूरादिभ्यो णिज् भवति धातोश्च इति सूत्रार्थः स्यात् तथा सति धातुमात्रद् हेतुमति च इति णिज विधानं पाणिनेरसङ्गतं भवेदिति शङ्काऽपि न रूचिरा, यतौ हेतुमति च इति णिज् विधानं न धातुमात्राज् णिजभवति इतिवचनं ज्ञापयत् स्वाशेचरितार्थं भवति। अत्र धातोः इत्यत्र स्वरितत्व स्वीकारे कण्डवादिभ्यो यक् इत्यत्रापि तदनुवृत्तिः स्यात्, सत्येवं कण्ड्वादिभ्यो यग् भवति धातोश्च इति सूत्रार्थः स्यात् तथा सति धातुमात्राद् यगापत्तिरित्यपि न वक्तव्यम्। यतः कण्ड्वादिभ्यः इत्यनेनानुवृत्ति धातौरित्यस्य सम्बन्धं स्वीकृत्य कण्ड्वादिभ्यो धातुभ्यो यग्भगवतीति सूत्रार्थोऽभ्युपगम्यत इति धातुमात्राद् यगापत्तेः प्रसक्तिरेव न भवति।

अत्रोच्यते धातुरित्येवं धातुशब्दमुच्चार्य विहितस्यैव प्रत्ययस्य आर्धधातुकसंज्ञा स्यादित्येवमर्थः द्वितीयमिदं धातोः इत्यधिकार सूत्रावश्यमेव। अन्यथा आर्धधातुकं शेषः इत्यनेन तिङशिदभिन्नानां धातोर्विहितानां सर्वेषां प्रत्ययानां स्यादार्धातुकसंज्ञा या आपत्तिः। न चेष्टापत्तिः 'भूभ्याम' पूज्याम इत्यादौ हि ई गुणावापद्येताम्। भेतोधातोर्विहित तत्वेन भ्यामादेरप्यार्धधातुकत्वम्। नहि क्विबन्ताधातुत्वं जहति। 'धातोः'[4] इति द्वितीयाधिकार सूत्रारंभे तु तव्यत्तादीनामिवभ्यामार्देत् आर्धधातुक संज्ञाया आपत्तिः प्राप्नोति। न हि धातोः इत्येवं शब्दमुच्चार्य यथा तव्यत्तव्यादयो विहितास्तथाभ्यामादयो विहिताः। ते प्रातिपदिकात् इत्येवं शब्दमुच्चार्य विहिताः।

किञ्च कृदुपपदसंज्ञार्थं धातोः इति द्वितीयमधिकारसूत्रमावश्यकम्। यतो यदि यङ् सूत्रस्थाद् धातोरित्यधिकारात् कृदुपपद संज्ञे स्यात् तर्हि भविष्यति इत्यादौ 'स्य' प्रत्ययस्यापि कृत्संज्ञास्यात् ततश्च कृत्तद्धितसमासाश्च इति प्रातिपदिकसंज्ञा 'भविष्य' इत्येवमादीनां दुर्वारा सत्यांच प्रातिपदिकसंज्ञायां 'हुं फट्' इत्यादाविव तेभ्य औत्सर्गिक वचनापत्तिः प्रसज्येत्। इत्थं च्लि लुङि इत्यत्र तत्रोपदमसप्तमीस्थम् इत्यनेन मुङोऽप्युपपदसंज्ञाया आपत्तिः स्यात्। न चेष्टापत्ति यतो 'लुङयुपपदे च्लिः इत्यसङगतः सूत्रार्थः प्रसज्येत। तस्मादस्मिन्नेव द्वितीयो धात्वाधिकारे कृदुपदसंज्ञो यथा स्यात् यङ् सूत्रोपात् धात्वाधिकारे कृदुपपदसंज्ञो मा भूतामित्येवमर्थं धातोः इत्यधिकारसूत्रं द्वितीयमावश्यकमेवेति निश्चप्रचम्।

इत्थं कृत्प्रत्ययाः धातुभ्य एव भवन्तीति कृत्प्रत्यय प्रकृति धातुरेवेति पाणिनीय व्याकरणस्य सर्व सम्मततोराद्धान्तः।

यद्यपि धातुविहिताः तिङभिन्नाः सर्वे प्रत्ययाः कृत्संज्ञकाः सन्ति तथापि सूची कटाहन्यायेन प्रथमं कृत्य प्रत्ययाः निरूप्यन्ते। 'कृत्या' इत्यधिकारेण ण्वुलः प्राग् धातुभ्यो विहिता ये सन्ति प्रत्ययास्ते कृत्संज्ञका इत्युच्चन्ते। यतः कृत्यसंज्ञा विधायक सूत्रं व्याचक्षाणो भट्टोजिदीक्षितः 'अधिकारोऽयं'[5] ण्वुलः प्राक् इत्य दत्यभिदधाति, ण्वुल तृचौ इत्यतः प्राग् मे प्रत्ययाः विधीयन्ते ते कृत्यसंज्ञका भवन्तीति तदर्थः। ण्वुल् प्रभृतयो धातुभ्यो विहिताः प्रत्ययास्तु कृत्संज्ञका एव भवन्ति न तु कृत्यसंज्ञका इति तदाभिप्रायः। दीक्षितस्य कथनमिदं भाष्यसम्मतं यतो भाष्ये ण्वुलः कृत्यसंज्ञावारणाय कृत्यसंज्ञायां प्राङ्ण्वुल इति वक्तव्यम् इति वार्तिकाकृतं वचनं भगवान् प्रत्याचख्यौ। कृत्यतृचश्चेति सूत्रे हि तृज्ग्रहणेन 'प्राङ्ण्वुलः कृत्यसंज्ञा भवतीति वचनं ज्ञापितं भवति। प्राङ्ण्वुलः कृत्संज्ञाभवतीति वचनस्याभावे हि तृचोऽपि कृत्यत्वं सुलभमिति तृजग्रहणमर्ज व्यर्थम्। ज्ञापिते तु प्राङ्ण्वुलः कृत्यसंज्ञा भवतीति वचने तृचः कृत्यसंज्ञायाः अप्राप्त्या कृत्यग्रहणेन तृचो ग्रहणं न संभवतीति सूत्रेऽस्मिन् तृजग्रहणं स्वांशेचरितार्थं भवति। न चैवमपि ण्वुलोऽपि कृत्संज्ञाप्राप्नोतीति शङक्यम्। यतोहि ज्ञापकमिदं योगापेक्षं 'ण्वुल तृचौ' इत्यस्माद योगात् प्राक् कृत्यसंज्ञाधिकारः, इत्येव वचनं कृत्यतृचश्च इति सूत्रस्थतृज ग्रहणेमानुमीयते इति हि योगापेक्षंज्ञापकमित्यस्यार्थः। कृत्यसंज्ञकाः प्रत्ययाः कृत्संज्ञकाः अपि भवन्ति। यतोऽमी धात्वाधिकारे विहिता सन्ति। 'कृदतिङ' इत्यनेन हि तेषां कृत्तत्वमपि अक्षुणम्।

अभी च कृत्य प्रत्ययाः यद्यपि सन्ति कृत्संज्ञकास्तथापि ते सामान्यतः कर्तरिकृत् इत्यनेन कर्तरि न भवति किन्तु भावकर्मगोरेव, यतः कर्तरिकृत इति सूत्रस्य अपवाद सूत्रं तयोरेव कृत्यक्तखलर्थाः इति पाणिना प्रोक्तम्। अत्र तच्छव्देन भावकर्मणो परामृश्येते, एषकारस्तु कर्तृयोगव्यवच्छेदार्थः। तदाह भट्टोजिदीक्षितः एते भावकर्मणोरेव स्युरिति। कृत्प्रत्ययाश्च भावेकर्मणि, करणे सम्प्रदाने, अपादाने च साक्षाद् विहिताः सन्ति।

**सन्दर्भ**

1. पाणिनीयसूत्रम्–3/1/91।
2. पाणिनीयसूत्रम्–3/1/33।
3. पाणिनीयसूत्रम्–1/4/13।
4. पाणिनीयसूत्रम्–3/1/91।
5. सिद्धान्तकौमुदीम्, पृष्ठसंख्या–277।